**आदौ-मुख्यवार्ता:**

- प्रधानमंत्री नरेंद्र मोदी महाराष्ट्रस्य वाशिम जनपदे पोहरदेवी स्थले यायावर बंजारा इति- विरासत - संग्रहालयस्य उद्घाटनं कृतवान् । प्राय: त्रिशतोत्तर - त्रयोविंशति- सहस्र- कोटिरूप्यकाणां कृषिक्षेत्रेण तथा पशुपालनक्षेत्रेण संबद्धानां योजनानां आरम्भं करोति।
- विदेश- मंत्री डॉक्टर सुब्रह्मण्यम् जयशंकर : न्यगदत् यत् इस्लामाबादे अक्तूबर - मासस्य पञ्चदश- षोडश-दिनाङ्कयो: शंघाई-सहयोग-संघटनस्य आगामिनि शिखरोपवेशनकाले भारतं पाकिस्तानेन सह संबंध- विषयेषु चर्चां न करिष्यति ।
- जम्मू-कश्मीरस्य कुपवाड़ा जनपदे अतिक्रमणस्य प्रयासं विफलं कुर्विद्भ सुरक्षाबले: आतंकवादिनः मारिता:।
- अमरीका - ब्रिटेनयो: सैन्यबलानि यमने विद्रोहिणां समुदायस्य- हौसी इत्यस्य नियंत्रणे द्वादशाधिकस्थलेषु आक्रमणम अकुर्वन ।
- महिला टी- 20 क्रिकेट विश्वचषक प्रतिस्पर्धायाम् अद्य शारजाहक्षेत्रे सायं सार्धसप्तवादने इंग्लैंडदलं बांग्लादेशदलं सम्मुखीकरिष्यति ।

**अथ वार्ताः**

**प्रधानमंत्री महाराष्ट्रस्य**

प्रधानमंत्री नरेंद्र मोदी महाराष्ट्रस्य वाशिम जनपदे पोहरदेवी स्थले यायावर बंजारा इति- विरासत -संग्रहालयस्य उद्घाटनं कृतवान् । चतुर्तलीयशालायां त्रयोदश दीर्घा: सन्ति। एताः चित्राणां माध्यमेन यायावरवर्गाणां बंजारा - विरासतम् प्रदर्शयन्ति। वाशिममुपगम्य प्रधानमन्त्रिणा सन्त सेवालाल महराजस्य तथा सन्त रामराव महराजस्य स्मारकस्थले पुष्पांजलि: समर्पित:। सन्त सेवालालः तथा सन्त रामरावः बंजारा इति यायावर - समुदायस्य आध्यात्मिकौ नेतारौ आस्ताम्। प्रधानमन्त्रिणा पोहरदेविस्थले जगदम्बायाः मन्दिरे दर्शनं पूजनं च कृतम्।

प्रधानमंत्री प्राय: त्रिशतोत्तर - त्रयोविंशति- सहस्र- कोटिरूप्यकाणां कृषिक्षेत्रेण तथा पशुपालनक्षेत्रेण संबद्धानां योजनानां आरम्भं करोति।

**पीएम किसान सम्मान**

अस्मिन् अवसरे केन्द्रस्य कृषिमन्त्री शिवराजसिंह चौहानः, मुख्यमन्त्री एकनाथ शिन्दे अन्ये च गणमान्याः जनाः उपस्थिताः सन्ति ।

स्वीय एकदिवसीय - यात्रायां, श्रीमोदी अद्य सायंकाले ठाणे नगरे प्रमुखानां मेट्रो मार्गाणां तथा मार्गेण सम्बद्धानां परियोजनानां उद्घाटनं शिलान्यासं च करोति।

**विदेश मंत्री एस. सी. ओ**

विदेश- मंत्री डॉक्टर सुब्रह्मण्यम् जयशंकर : न्यगदत् यत् इस्लामाबादे अक्तूबर - मासस्य पञ्चदश-षोडश-दिनाङ्कयो: शंघाई-सहयोग-संघटनस्य आगामिनि शिखरोपवेशनकाले भारतं पाकिस्तानेन सह संबंध- विषयेषु चर्चां न करिष्यति । डॉक्टर जयशंकर: सबलं प्रोक्तवान् यत् शिखरोपवेशने तस्य सहभागिता बहुपक्षीय- संबंधेषु केन्द्रिता भविष्यति।

**जम्मू-कश्मीर:**

जम्मू-कश्मीरस्य कुपवाड़ा जनपदे अतिक्रमणस्य प्रयासं विफलं कुर्विद्भ सुरक्षाबले: आतंकवादिनः मारिता: श्रीनगरस्थेन चिनार - कोरेण एकस्मिन जनसम्पर्क माध्यम पटले प्रोक्तम् यत् अतिक्रमणस्य प्रयासविषये गोपनीय- सूचना-संप्रापणे सति सैनिका जम्मू-कश्मीरस्य आरक्षिणश्च संयुक्तररूपेण अभियानम् अकरोत। अस्मिन् संघर्षे द्वौ आतंकवानिनौ हतौ ।

**विराम:**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति।**

**अमरीका - ब्रिटेन**

अमरीका - ब्रिटेनयो: सैन्यबलानि यमने विद्रोहिणां समुदायस्य- हौसी इत्यस्य नियंत्रणे द्वादशाधिकस्थलेषु आक्रमणम अकुर्वन । अमरीकीय - आधिकारिणां अनुसारेण ई रावेन समर्थितस्य अस्य विद्रोहिण: समूहस्य प्रमुखानि - शस्त्रास्त्र-प्रणाली, सैन्यनिलय : अन्यानि च प्रकरणानि निधाय आक्रमणं विहितम् । इदं सैन्य-क्रियान्वयनं अस्मिन् क्षेत्रे ईरानदेशे एधमानेन प्रभावेण अमरीका- ब्रिटेनयोः संजातायाः चिंताया: अनन्तरम अभवत् ।

**शास्त्रीयभाषा**

केंद्रप्रशासनेन मराठी-पाली-प्राकृत-असमिया, बंगाली च भाषा: शास्त्रीयभाषात्वेन स्वीकृता:। अनेन ऐतिहासिकनिर्णयेन भारतस्य शास्त्रीयभाषाणां संख्या षट्तः एकादश जाता, यत् अस्माकं सांस्कृतिकविविधतां तथा ऐतिहासिकगौरवं विश्वस्तरे प्रकाशयिष्यति।

**उपराष्ट्रपतिः जगदीपधनखड:**

उपराष्ट्रपतिः जगदीपधनखड: अवादीत् यत् पूर्वोत्तरं देशस्य हृदयं आत्मा अस्ति । नवदिल्ल्यां कार्यक्रमं सम्बोधयन् धनखडमहोदय: अब्रवीत् यत् पूर्वोत्तरः केवलं भौगोलिकक्षेत्रं न अपितु भारतस्य सारं प्रतिबिम्बयति संस्कृतिपरम्पराणां प्राकृतिकसौन्दर्यस्य च जीवन्तं परिदृश्यमस्ति।

उपराष्ट्रपतिना क्षेत्रस्यास्य समृद्धं आध्यात्मिकं प्राकृतिकं च धरोहरं अवलोक्य तस्य जीवन्तसंस्कृतेः, उत्तमभोजनस्य, जनानां ऊर्जायाः च प्रशंसाकृता । श्री धनखड: असमियाभाषायाः शास्त्रीयभाषासु मान्यता विषये

प्रकाशम् ददौ । सः अवोचत् यत् अस्य सकारात्मको प्रभावः भविता, सममेव पदक्षेपोऽयं देशस्य समृद्धं सांस्कृतिकधरोहरं विविधतां च प्रदर्शयति।

**छत्तीसगढ**

छत्तीसगढे आरक्षिणा संघर्षे -स्थलात् माओवादि-इत्येषां त्रीणि पार्थिव शरीराणि निगृहीतानि । ह्यः अबुझमाड क्षेत्रे सुरक्षाबलै : सह संघर्षे मृतकानां संख्या एकत्रिंशत् संजाता । नारायणपुर-दंतेवाडा - जनपदयो: सीम्नि नेंदूर-थुलथुली - वने एषः संघर्ष: तस्मिन् काले संजातः यदा तस्मिन् स्थाने माओवादिनां तत्स्थाने सूचना-प्राप्ते जनपद- आरक्षि-रक्षकस्य विशेष कार्यबलस्य च संयुक्तं दलं निरीक्षण- अभियाने आसीत्।

**प्रधानमन्त्री खादी**

नरेन्द्रमोदी अद्य खादी इत्यस्य विक्रयस्य अपूर्वाभिलेखस्य विषये प्रशंसाम् अकरोत्। सामाजिकान्तर्जालीय पटले तेन देशवासिनां मध्ये स्वदेशिनं प्रति तीव्रगत्या वर्धमानस्य - प्रवृत्ते : विषये टिप्पणी कृता । खादी इण्डिया इत्यनेन अपूर्वाभिलेख–विक्रयो-प्राप्तः । अवधेयास्पदं वर्तते यत् गान्धीजयन्त्यवसरे नवदिल्ल्यां खादीभवने केवलं एकस्मिन दिने सप्तत्रिंशत् सहस्त्रोत्तर एकलक्षाधिक द्विकोटिः-उत्पादानां विक्रयः अभवत् ।

**राष्ट्रीयान्वेषण- अभिकरणेन**

राष्ट्रीयान्वेषण- अभिकरणेन जम्मू-कश्मीर- उत्तरप्रदेश- असम दिल्लीराज्येषु द्वाविंशति स्थानेषु अन्वेषणकार्यं विधीयते। आतंकि समूहस्य जैश-ए-मोहम्मद इत्येतस्य क्रियाकलापसम्बद्धेषु प्रकरणेषु अन्वेषणाभियानं प्रचाल्यते ।

**प्रहलाद-जोशी जर्मनी यात्रा**

केन्द्रीयनव - नवीकरणीय ऊर्जा -मन्त्री प्रहलाद-जोशी श्वः आरभ्य जर्मनी देशस्य त्रिदिवसीय यात्रा विधास्यति । स्वयात्रावधौ मन्त्री द्विदिवसात्मके "हैम्बर्ग - सस्टेनेबिलिटी" इति सम्मेलने भागं गृह्णीयात् । स: जर्मनीदेशस्य मन्त्रिभिः सह वरिष्ठाधिकारिभि: सह द्विपक्षीय – समागमस्य श्रृङखलामपि आयोक्ष्यति।

**क्रीडा**

क्रीडा आई एस एस एफ जूनियर (कनिष्ठ) विश्व - लक्ष्यसंधान प्रतियोगितायां भारतीय लक्ष्यसंधात्री । द्विवांशी महिलानां पंचविंशति मीटर स्टैंडर्ड- पिस्टल इति स्पर्धायां द्वितीयं स्वर्णपदकं प्राप्तवती । पुरुषेषु सूरज शर्मा च स्वर्णपदकं विजितवान्। अपरत्र भारतीय-लक्ष्यसंधात्री वैष्णवी- पवारः ताइपे नगरे अष्टादशात् न्यून वयसः महिला- दलीयवर्गे रजत-पदकं सम्प्राप्नोत्।

**संस्कृत-साप्ताहिकी**

**प्रियाः श्रोतारः, संस्कृतजगता सम्बद्धैः विभिन्नैः क्रियाकलापैः संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्याः एफ.एम.गोल्ड-प्रवाहिकातः रविवासरे मध्याह्ने सार्धैक- वादनतः भविष्यति। कृपया श्रृष्वन्तु भवन्त्रः सर्वे श्रोतु प्रभवन्ति । भवति, आशिसे भवन्तः प्रति निवास- श्रीष्यन्तीति।**

-

**संस्कृत -संगोष्ठी**

दिल्ली - संस्कृत - अकादमी, मातासुन्दरी महाविद्यालयस्य च संयुक्ततत्त्वावधाने ऑक्टूबर मासस्य चतुर्थे दिनाङ्के "सामाजिक- राष्ट्रियपरिप्रेक्ष्ये संस्कृतनिष्ठ पत्रकारिता" इति विषयमवलम्ब्य संगोष्ठी आयोजिता ।

**।।इति वार्ता:।।**